শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱণ্শঠকোপ শ্রীৱেদান্তদেশিক যতীন্দ্র মহাদেশিকৈরনুগৃহীতা

# ॥ শ্রী লক্ষ্মীনৃসিংহপ্রপত্তিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী লক্ষ্মীনৃসিংহপ্রপত্তিঃ ॥

যস্যাভৱদ্ভক্তজনার্তিহন্তুঃ
    পিতৃৎৱমন্যেষ্ৱৱিচার্য তূর্ণম্।
স্তম্ভেঽৱতারস্তমনন্যলভ্যং
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ **1** ॥

শ্রীতাপনীযেঽপ্রতিমপ্রভাৱম্
    শ্রীতৈত্তিরীযেকুচরোগিরীষ্ঠঃ।
ইতীৱ পক্ষীন্দ্রধরাধরস্থং
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ **2** ॥

সংৱর্গ ৱিদ্যা ৱিলসৎস্ৱরূপং
    স্তম্ভৈকডিম্ভাত্মলসৎপ্রভাৱম্।
ত্রৈলোক্যসম্পূর্ণনৃসিংহমূর্তিং
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ **3** ॥

হিরণ্যদাতারমপীন্দ্রহেতোঃ
    হিরণ্যহন্তারমথাষ্টবাহুম্।
শান্তং সতাম্ উগ্রম্ অসৎসমাজে
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ **4** ॥

সন্তোষহাসেন সদারমাযাং
    ৱ্যান্তাননং স্ৱর্ণ সটাভিরামম্।
জিহ্ৱাধরন্যস্ত রমেক্ষণান্তং
    লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে ॥ **5** ॥

সঞ্চারযোগ্যাং চ পদাৱহন্তং
   শ্রীপাদুকাং চেঞ্চুসুতাং রমাং চ।
সৱ্যেন হস্তেন পরিষ্ৱজন্তং
   লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **6**॥

শ্রীমদ্ দ্বযার্থো হ্যহমেৱ সত্যম্
   ইতীৱ সর্ৱান্ প্রতিবোধযন্তম্।
রমানৃসিংহন্ত্ৱৱিভক্তরূপং
   লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **7**॥

শ্রীৱেঙ্কটেশেন ৱিৱাহকালে
   সম্পূজিতং সর্ৱৱিধোপচারৈঃ।
শ্রীশঙ্খচক্রাভযবাহুদীপ্তং
   লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **8**॥

অহোবিলং সানুজ এত্য রামঃ
   রমাহরের্যস্য চকার পূজাম্।
পদ্যৈশ্চ পঞ্চামৃত ভোগ্যশব্দৈঃ
   লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **9**॥

সমাশ্রযার্থন্ত্বপরাধিৱর্গে
   সমাগতে তত্র নিৱৃত্তৱক্ত্রম্।
শ্রীৱাক্যসন্তুষ্ট কৃপার্দ্রনেত্রং
   লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **10**॥

সঞ্চারযোগ্যং প্রসমীক্ষ্যকালং
   কালে কলৌ যস্ত্ৱরযাঽভ্যষিঞ্চৎ।
শ্রীৱাসনামানমহো মুনীন্দ্রং
   লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **11**॥

সমাশ্রিতানামিহ সেৱনার্থম্
অহোবিলেহ্যদ্যমঠে জ্ৱলন্তম্।
সুৱর্ণডোলাৱিলসৎস্বৱরূপং
লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **12**॥

শ্রীৱণ্শঠারাতিযতীন্দ্র পূর্ৱৈঃ
স্থানেঽভিষিক্তৈর্যতিরাজচন্দ্রৈঃ।
সম্পূজিতং হ্যাত্মদমাত্মদানাং
লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **13**॥

অহোবিলে গারুডশৈলমধ্যে
কৃপাৱশাৎ কল্পিত সন্নিধানম্।
লক্ষ্ম্যা সমালিঙ্গিতৱামভাগং
লক্ষ্মীনৃসিংহং শরণং প্রপদ্যে॥ **14**॥

লক্ষ্মীনৃসিংহার্চন হৃষ্টচিত্তঃ
ভক্ত্যৈৱ ৱেদান্তগুরুর্যতীন্দ্রঃ।
লক্ষ্মীনৃসিংহস্য শুভাং প্রপত্তিং
চক্রে জনানাং নিখিলার্থসিদ্ধ্যৈ॥ **15**॥

॥ ইতি শ্রী লক্ষ্মীনৃসিংহপ্রপত্তিঃ সমাপ্তা॥